# vAyu stuti, praising hari (trivikrama paNDita)

# વાયુસ્તુતિઃ અથવા ખિલવાયુસ્તુતિઃ

## Document Information

Text title : vAyu stuti

File name : vAyu_stuti.itx

Category : vishhnu, vishnu_misc, stotra, vishnu

Location : doc_vishhnu

Author : Trivikrama PaNDita

Transliterated by : H. P. Raghunandan, Shrisha Rao shrao at dvaita.org

Proofread by : H. P. Raghunandan, Shrisha Rao shrao at dvaita.org

Latest update : May 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

vAyu stuti, praising hari (trivikrama paNDita)

# વાયુસ્તુતિઃ અથવા ખિલવાયુસ્તુતિઃ

॥ શ્રીહરિવાયુસ્તુતિઃ ॥

॥ અથ શ્રીનખસ્તુતિઃ ॥

પાન્ત્વસ્માન્ પુરુહૂતવૈરિ બલવન્માતઙ્ગ માદ્યદ્ઘટા
    કુમ્ભોચ્ચાદ્રિ વિપાટનાધિકપટુ પ્રત્યેક વજ્રાયિતાઃ ।
શ્રીમત્કણ્ઠીરવાસ્ય પ્રતત સુનખરા દારિતારાતિદૂર
    પ્રદ્ધ્વસ્તધ્વાન્ત શાન્ત પ્રવિતત મનસા ભાવિતાનાકિવૃન્દૈઃ ॥ ૧॥ ભાવિતા ભૂરિભાગૈઃ

લક્ષ્મીકાન્ત સમન્તતોઽપિકલયન્ નૈવેશિતુસ્તે સમં
    પશ્યામ્યુત્તમ વસ્તુ દૂરતરતોપાસ્તં રસોયોઽષ્ટમઃ ।
યદ્રોશોત્કર દક્ષ નેત્ર કુટિલ પ્રાન્તોત્થિતાગ્નિ સ્ફુરત્
    ખદ્યોતોપમ વિસ્ફુલિઙ્ગભસિતા બ્રહ્મેશશક્રોત્કરાઃ ॥ ૨॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતા
શ્રીનૃસિંહનખસ્તુતિઃ સમ્પૂર્ણા ।

॥ અથ શ્રીહરિવાયુસ્તુતિઃ ॥

શ્રીમદ્વિષ્ણ્વઙ્ઘ્રિ નિષ્ઠા અતિગુણગુરુતમ શ્રીમદાનન્દતીર્થ
    ત્રૈલોક્યાચાર્ય પાદોજ્જ્વલ જલજલસત્ પાંસવોઽસ્માન્પુનન્તુ ।
વાચાંયત્રપ્રણેત્રીત્રિભુવનમહિતા શારદા શારદેન્દુઃ
    જ્યોત્સ્નાભદ્રસ્મિત શ્રીધવળિતકકુભાપ્રેમભારમ્ભભાર ॥ ૧॥

ઉત્કણ્ઠાકુણ્ઠકોલાહલજવવિદિતાજસ્રસેવાનુવૃદ્ધ
    પ્રાજ્ઞાત્મજ્ઞાન ધૂતાન્ધતમસસુમનો મૌલિરત્નાવળીનામ્ ।
ભક્ત્યુદ્રેકાવગાઢ પ્રઘટનસઘટાત્કાર સઙ્ઘૃષ્યમાણ
    પ્રાન્તપ્રાગ્ર્યાઙ્ઘ્રિ પીઠોત્થિત કનકરજઃ પિઞ્જરારઞ્જિતાશાઃ ॥ ૨॥

જન્માધિવ્યાધ્યુપાધિપ્રતિહતિવિરહપ્રાપકાણાં ગુણાનામ્
    અગ્ર્યાણાં અર્પકાણાં ચિરમુદિતચિદાનન્દ સન્દોહદાનામ્ ।

એતેષામેશદોષ પ્રમુષિતમનસાં દ્વેષિણાં દૂષકાણામ્
    દૈત્યાનામાર્થિમન્ધે તમસિ વિદધતાં સંસ્તવેનાસ્મિ શક્તઃ ॥ ૩॥

અસ્યાવિષ્કર્તુકામં કલિમલકલુષેઽસ્મિન્જનેજ્ઞાનમાર્ગમ્
    વન્દ્યં ચન્દ્રેન્દ્રરુદ્ર દ્યુમણિફણિવયોઃ નાયકદ્યૈરિહાદ્ય ।
મધ્વાખ્યં મન્ત્રસિદ્ધં કિમુતકૃતવતો મારુતસ્યાવતારમ્
    પાતારં પારમેષ્ટ્યં પદમપવિપદઃ પ્રાપ્તુરાપન્ન પુંસામ્ ॥ ૪॥

ઉદ્યદ્વિદ્યુત્પ્રચણ્ડાં નિજરુચિ નિકરવ્યાપ્ત લોકાવકાશો
    બિભ્રદ્ભીમો ભુજેયોઽભ્યુદિત દિનકરાભાઙ્ગદાઢ્ય પ્રકાણ્ડે ।
વીર્યોદ્ધાર્યાં ગદાગ્ર્યામયમિહ સુમતિંવાયુદેવોવિદધ્યાત્
    અધ્યાત્મજ્ઞાનનેતા યતિવરમહિતો ભૂમિભૂષામર્ણિમે ॥ ૫॥

સંસારોત્તાપનિત્યોપશમદ સદય સ્નેહહાસામ્બુપૂર
    પ્રોદ્યદ્વિદ્યાવનદ્ય દ્યુતિમણિકિરણ શ્રેણિસમ્પૂરિતાશઃ ।
શ્રીવત્સાઙ્કાધિ વાસોચિત તરસરલશ્રીમદાનન્દતીર્થ
    ક્ષીરામ્ભોધિર્વિભિન્દ્યાદ્ભવદનભિમતમ્ભૂરિમેભૂતિ હેતુઃ ॥ ૬॥

મૂર્ધન્યેષોઽન્જલિર્મે દૃઢતરમિહતે બધ્યતે બન્ધપાશ
    ક્ષેત્રેધાત્રે સુખાનાં ભજતિ ભુવિ ભવિષ્યદ્વિધાત્રે દ્યુભર્ત્રે ।
અત્યન્તં સન્તતં ત્વં પ્રદિશ પદયુગે હન્ત સન્તાપ ભાજામ્
    અસ્માકં ભક્તિમેકાં ભગવત ઉતતે માધવસ્યાથ વાયોઃ ॥ ૭॥

સાભ્રોષ્ણાભીશુ શુભ્રપ્રભમભયનભો ભૂરિભૂભૃદ્વિભૂતિઃ
    ભ્રાજિષ્ણુર્ભૂરૃભૂણાં ભવનમપિ વિભોઽભેદિબભ્રેબભૂવે ।
યેનભ્રોવિભ્રમસ્તે ભ્રમયતુસુભૃશં બભ્રુવદ્દુર્ભૃતાશાન્
    ભ્રાન્તિર્ભેદાવ ભાસસ્ત્વિતિભયમભિ ભોર્ભૂક્ષ્યતોમાયિભિક્ષૂન્ ॥ ૮॥

યેઽમુમ્ભાવમ્ભજન્તે સુરમુખસુજનારાધિતં તે તૃતીયમ્
    ભાસન્તે ભાસુરૈસ્તે સહચરચલિતૈશ્ચામરૈશ્ચારુવેશાઃ ।
વૈકુણ્ઠે કણ્ઠલગ્ન સ્થિરશુચિ વિલસત્કાન્તિ તારુણ્યલીલા
    લાવણ્યા પૂર્ણકાન્તા કુચભરસુલભાશ્લેષસમ્મોદસાન્દ્રાઃ ॥ ૯॥

આનન્દાન્મન્દમન્દા દદતિ હિ મરુતઃ કુન્દમન્દારનન્દ્યાવર્તા
    ઽમોદાન્ દધાનાં મૃદુપદ મુદિતોદ્ગીતકૈઃ સુન્દરીણામ્ ।
વૃન્દૈરાવન્દ્ય મુક્તેન્દ્વહિમગુ મદનાહીન્દ્ર દેવેન્દ્રસેવ્યે
    મૌકુન્દે મન્દરેઽસ્મિન્નવિરતમુદયન્મોદિનાં દેવ દેવ ॥ ૧૦॥

ઉત્તમાત્યુત્કટત્વિટ્ પ્રકટકટકટ ધ્વાનસઙ્ઘટ્ટનોદ્યદ્
    વિદ્યુદ્વ્યૂઢસ્ફુલિઙ્ગ પ્રકર વિકિરણોત્ક્વાથિતે બાધિતાઙ્ગાન્ ।
ઉદ્ગાઢમ્પાત્યમાના તમસિ તત ઇતઃ કિઙ્કરૈઃ પઙ્કિલેતે
    પઙ્ક્તિર્ગ્રાવ્ણાં ગરિમ્ણાં ગ્લપયતિ હિ ભવદ્દ્વેષિણો વિદ્વદાદ્ય ॥ ૧૧॥

અસ્મિન્નસ્મદ્ગુરૂણાં હરિચરણ ચિરધ્યાન સન્મઙ્ગલાનામ્
    યુષ્માકં  પાર્શ્વભૂમિં ધૃતરણરણિકઃ સ્વર્ગિસેવ્યાંપ્રપન્નઃ ।
યસ્તૂદાસ્તે સ આસ્તેઽધિભવમસુલભ ક્લેશ નિર્મૂકમસ્ત
    પ્રાયાનન્દં કથં ચિન્નવસતિ સતતં પઞ્ચકષ્ટેઽતિકષ્ટે ॥ ૧૨॥

ક્ષુત્ ક્ષામાન્ રૂક્ષરક્ષો રદખરનખર ક્ષુણ્ણવિક્ષોભિતાક્ષાન્
    આમગ્નાનાન્ધકૂપે ક્ષુરમુખમુખરૈઃ પક્ષિભિર્વિક્ષતાઙ્ગાન્ ।
પૂયાસૃન્મૂત્ર વિષ્ઠા ક્રિમિકુલકલિલેતત્ક્ષણક્ષિપ્ત શક્ત્યાદ્યસ્ત્ર
    વ્રાતાર્દિતાન્ સ્ત્વદ્વિષ ઉપજિહતે વજ્રકલ્પા જલૂકાઃ ॥ ૧૩॥

માતર્મેમાતરિશ્વન્ પિતરતુલગુરો ભ્રાતરિષ્ટાપ્તબન્ધો
    સ્વામિન્સર્વાન્તરાત્મન્નજરજરયિતઃ જન્મમૃત્યામયાનામ્ ।
ગોવિન્દે દેહિભક્તિં ભવતિચ ભગવન્નૂર્જિતાં નિર્નિમિત્તામ્
    નિર્વ્યાજાં નિશ્ચલાં સદ્ગુણગણ બૃહતીં શાશ્વતીમાશુદેવ ॥ ૧૪॥

વિષ્ણોરત્ત્યુત્તમત્વાદખિલગુણગણૈસ્તત્ર ભક્તિઙ્ગરિષ્ઠામ્
    સંશ્લિષ્ટે શ્રીધરાભ્યામમુમથ પરિવારાત્મના સેવકેષુ ।
યઃ સન્ધત્તે વિરિઞ્ચિ શ્વસન વિહગપાનન્ત રુદ્રેન્દ્ર પૂર્વે
    ષ્વાધ્યાયંસ્તારતમ્યં સ્ફુટમવતિ સદા વાયુરસ્મદ્ગુરુસ્તમ્ ॥ ૧૫॥

તત્ત્વજ્ઞાન્ મુક્તિભાજઃ સુખયિસિ હિ ગુરો યોગ્યતાતારતમ્યાત્
    આધત્સે મિશ્રબુદ્ધિં સ્ત્રિદિવનિરયભૂગોચરાન્નિત્યબદ્ધાન્ ।
તામિસ્રાન્ધાદિકાખ્યે  તમસિસુબહુલં દુઃખયસ્યન્યથાજ્ઞાન્
    વિષ્ણોરાજ્ઞાભિરિત્થં શ્ૃતિ શતમિતિહાસાદિ ચાકર્ણયામઃ ॥ ૧૬॥

વન્દેઽહં તં હનૂમાનિતિ મહિતમહાપૌરુષો બાહુશાલિ
    ખ્યાતસ્તેઽગ્ર્યોઽવતારઃ સહિત ઇહ બહુબ્રહ્મચર્યાદિ ધર્મૈઃ ।
સસ્નેહાનાં સહસ્વાનહરહરહિતં નિર્દહન્ દેહભાજામ્
    અંહોમોહાપહો યઃ સ્પૃહયતિ મહતીં ભક્તિમદ્યાપિ રામે ॥ ૧૭॥

પ્રાક્પઞ્ચાશત્સહસ્રૈર્વ્યવહિતમહિતં યોજનૈઃ પર્વતં ત્વમ્

યાવત્સઞ્જીવનાદ્યૌષધ નિધિમધિકપ્રાણલઙ્કામનૈષિઃ ।
અદ્રાક્ષીદુત્પતન્તં તત ઉત ગિરિમુત્પાટયન્તં ગૃહીત્વા
યાન્તં ખે રાઘવાઙ્ઘ્રૌ પ્રણતમપિ તદૈકક્ષણે ત્વાંહિલોકઃ ॥ ૧૮॥

ક્ષિપ્તઃ પશ્ચાત્સત્સલીલં શતમતુલમતે યોજનાનાં સ
ઉચ્ચસ્તાવદ્વિસ્તાર વંશ્ચાપિ ઉપલલવૈવ વ્યગ્રબુદ્ધ્યા ત્વયાતઃ ।
સ્વસ્વસ્થાનસ્થિતાતિ સ્થિરશકલ શિલાજાલ સંશ્લેષ નષ્ટ
છેદાઙ્કઃ પ્રાગિવાભૂત્ કપિવરવપુષસ્તે નમઃ કૌશલાય ॥ ૧૯॥

દૃષ્ટ્વા દૃષ્ટાધિપોરઃ સ્ફુટિતકનક સદ્વર્મ ધૃષ્ટાસ્થિકૂટમ્
નિષ્પિષ્ટં હાટકાદ્રિ પ્રકટ તટ તટાકાતિ શઙ્કો જનોઽભૂત્ ।
યેનાજૌ રાવણારિપ્રિયનટનપટુર્મુષ્ટિરિષ્ટં પ્રદેષ્ટુમ્
કિંનેષ્ટે મે સ તેઽષ્ટાપદકટ કતટિત્કોટિ ભામૃષ્ટ કાષ્ઠઃ ॥ ૨૦॥

દેવ્યાદેશ પ્રણીતિ દૃહિણ હરવરાવદ્ય રક્ષો વિઘાતા
ઽઘાસેવોદ્યદ્દયાર્દ્રઃ સહભુજમકરોદ્રામનામા મુકુન્દઃ ।
દુષ્પ્રાપે પારમેષ્ઠ્યે કરતલમતુલં મૂર્ધિવિન્યસ્ય ધન્યમ્
તન્વન્ભૂયઃ પ્રભૂત પ્રણય વિકસિતાબ્જેક્ષણસ્ત્વેક્ષમાણઃ ॥ ૨૧॥

જઘ્નેનિઘ્નેનવિઘ્નો  બહુલબલબકધ્વંસ નાદ્યેનશોચત્
વિપ્રાનુક્રોશ પાશૈરસુ વિધૃતિ સુખસ્યૈકચક્રાજનાનામ્ ।
તસ્મૈતેદેવ કુર્મઃ કુરુકુલપતયે કર્મણાચપ્રણામાન્
કિર્મીરં દુર્મતીનાં પ્રથમં અથ ચ યો નર્મણા નિર્મમાથ ॥ ૨૨॥

નિર્મૃદ્નન્નત્ય યત્નં વિજરવર જરાસન્ધ કાયાસ્થિસન્ધીન્
યુદ્ધે ત્વં સ્વધ્વરે વાપશુમિવદમયન્ વિષ્ણુ પક્ષદ્વિડીશમ્ ।
યાવત્પ્રત્યક્ષ ભૂતં નિખિલમખભુજં તર્પયામાસિથાસૌ
તાવત્યાયોજિ તૃપ્ત્યાકિમુવદ ભઘવન્ રાજસૂયાશ્વમેધે ॥ ૨૩॥

ક્ષ્વેલાક્ષીણાટ્ટહાસહં તવરણમરિહન્નુદ્ગદોદ્દામબાહોઃ
બહ્વક્ષૌહિણ્ય નીકક્ષપણ સુનિપુણં યસ્ય સર્વોત્તમસ્ય ।
શુશ્રૂશાર્થં ચકર્થ સ્વયમયમથ સંવક્તુમાનન્દતીર્થ
શ્રીમન્નામન્સમર્થસ્ત્વમપિ હિ યુવયોઃ પાદપદ્મં પ્રપદ્યે ॥ ૨૪॥

દૃહ્યન્તીંહૃદૃહં માં દૃતમનિલ બલાદ્રાવયન્તીમવિદ્યા
નિદ્રાંવિદ્રાવ્ય સદ્યો રચનપટુમથાપાદ્યવિદ્યાસમુદ્ર ।
વાગ્દેવી સા સુવિદ્યા દ્રવિણદ વિદિતા દ્રૌપદી રુદ્રપત્ન્યાત્

ઉદ્રિક્તાદ્રાગભદ્રા દ્રહયતુ દયિતા પૂર્વભીમાજ્ઞયાતે ॥ ૨૫॥

યાભ્યાં શુશ્રૂષુરાસીઃ કુરુકુલ જનને ક્ષત્રવિપ્રોદિતાભ્યામ્
બ્રહ્મભ્યાં બૃંહિતાભ્યાં ચિતસુખ વપુષા કૃષ્ણનામાસ્પદાભ્યામ્ ।
નિર્ભેદાભ્યાં વિશેષાદ્વિવચન વિશયાભ્યામુભાભ્યામમૂભ્યામ્
તુભ્યં ચ ક્ષેમદેભ્યઃ સરિસિજવિલસલ્લોચનેભ્યો નમોઽસ્તુ ॥ ૨૬॥

ગચ્છન્ સૌગન્ધિકાર્થં પથિ સ હનુમતઃ પુચ્છમચ્છસ્ય
ભીમઃ પ્રોધ્દર્તું નાશકત્સ ત્વમુમુરુવપુષા ભીષયામાસ ચેતિ ।
પૂર્ણજ્ઞાનૌજસોસ્તે ગુરુતમવપુષોઃ શ્રીમદાનન્દતીર્થ
ક્રીડામાત્રં તદેતત્ પ્રમદદ સુધિયાં મોહક દ્વેષભાજામ્ ॥ ૨૭॥

બહ્વીઃ કોટીરટીકઃ કુટલકટુમતીનુત્કટાટોપ કોપાન્
દ્રાક્શ્યત્વં સત્વરત્વાચ્ચરણદ ગદયા પોથયામાસિથારીન્ ।
ઉન્મથ્યા તત્થ્ય મિથ્યાત્વ વચન વચનાન્ ઉત્પથસ્થાંસ્તથાઽયાન્
પ્રાયચ્છઃ સ્વપ્રિયાયૈ પ્રિયતમ કુસુમં પ્રાણ તસ્મૈ નમસ્તે ॥ ૨૮॥

દેહાદુત્ક્રામિતાનામધિપતિ રસતામક્રમાદ્વક્રબુદ્ધિઃ
ક્રુધ્દઃ ક્રોધૈકવશ્યઃ ક્રિમિરિવ મણિમાન્ દુષ્કૃતી નિષ્ક્રિયાર્થમ્ ।
ચક્રે ભૂચક્રમેત્ય ક્રકચમિવ સતાં ચેતસઃ કષ્ટશાસ્ત્રં
દુસ્તર્કં ચક્રપાણેર્ગુણગણ વિરહં જીવતાં ચાધિકૃત્ય ॥ ૨૯॥

તદ્દુત્પ્રેક્ષાનુસારાત્કતિપય કુનરૈરાદૃતોઽન્યૈર્વિસૃષ્ટો
બ્રહ્માહં નિર્ગુણોઽહં વિતથમિદમિતિ હ્યેષપાશણ્ડવાદઃ ।
તદ્યુક્ત્યાભાસ જાલ પ્રસર વિષતરૂદ્દાહદક્ષપ્રમાણ
જ્વાલામાલાધરોઽગ્નિઃ પવન વિજયતે તેઽવતારસ્તૃતીયઃ ॥ ૩૦॥

આક્રોશન્તોનિરાશા ભયભર વિવશસ્વાશયાચ્છિન્નદર્પા
વાશન્તો દેશનાશસ્વિતિ બત કુધિયાં નાશમાશાદશાઽશુ ।
ધાવન્તોઽશ્લીલશીલા વિતથ શપથ શાપા શિવાઃ શાન્ત શૌર્યાઃ
ત્વદ્વ્યાખ્યા સિંહનાદે સપદિ દદૃશિરે માયિ ગોમાયવસ્તે ॥ ૩૧॥

ત્રિષ્વપ્યેવાવતારેષ્વરિભિરપઘૃણં હિંસિતોનિર્વિકારઃ
સર્વજ્ઞઃ સર્વશક્તિઃ સકલગુણગણાપૂર્ણ રૂપપ્રગલ્ભઃ ।
સ્વચ્છઃ સ્વચ્છન્દ મૃત્યુઃ સુખયસિ સુજનં દેવકિં ચિત્રમત્ર
ત્રાતા યસ્ય ત્રિધામા જગદુતવશગં કિઙ્કરાઃ શઙ્કરાદ્યાઃ ॥ ૩૨॥

ઉદ્યન્મન્દસ્મિત શ્રીર્મૃદુ મધુમધુરાલાપ પીયૂષધારા
    પૂરાસેકોપશાન્તા સુખસુજન મનોલોચના પીયમાનં ।
સન્દ્રક્ષ્યેસુન્દરં સન્દુહદિહ મહદાનન્દં આનન્દતીર્થ
    શ્રીમદ્વક્ત્રેન્દુ બિમ્બં દુરતનુદુદિતં નિત્યદાહં કદાનુ ॥ ૩૩॥

પ્રાચીનાચીર્ણ પુણ્યોચ્ચય ચતુરતરાચારતશ્ચારુચિત્તાન્
    અત્યુચ્ચાં રોચયન્તીં શ્ૃતિચિત વચનાંશ્રાવ કાંશ્ચોદ્યચુચ્ચૂન્ ।
વ્યાખ્યામુત્ખાત દુઃખ્યાં ચિરમુચિત મહાચાર્ય ચિન્તારતાંસ્તે
    ચિત્રાં સચ્છાસ્ત્રકર્તાશ્ચરણ પરિચરાં છ્રાવયાસ્માંશ્ચકિઞ્ચિત્ ॥ ૩૪॥

પીઠેરત્નોકપક્લૃપ્તે રુચિરરુચિમણિ જ્યોતિષા સન્નિષણ્ણમ્
    બ્રહ્માણં ભાવિનં ત્વાં જ્વલતિ નિજપદે વૈદિકાદ્યા હિ વિદ્યાઃ ।
સેવન્તે મૂર્તિમત્યઃ સુચરિતચરિતં ભાતિ ગન્ધર્વ ગીતં
    પ્રત્યેકં દેવસંસત્સ્વપિ તવ ભઘવન્નર્તિતદ્યોવધૂષુ ॥ ૩૫॥

સાનુક્રોષૈરજસ્રં જનિમૃતિ નિરયાદ્યૂર્મિમાલાવિલેઽસ્મિન્
    સંસારાબ્ધૌનિમગ્નાંશરણમશરણાનિચ્છતો વીક્ષ્યજન્તૂન્ ।
યુષ્માભિઃ પ્રાથિતઃ સન્ જલનિધિશયનઃ સત્યવત્યાં મહર્ષેઃ
    વ્યક્તશ્ચિન્માત્ર મૂર્તિનખલુ ભગવતઃ પ્રાકૃતો જાતુ દેહઃ ॥ ૩૬॥

અસ્તવ્યસ્તં સમસ્તશ્ૃતિ ગતમધમૈઃ રત્નપૂગં યથાન્ધૈઃ
    અર્થં લોકોપકૃત્યૈઃ ગુણગણનિલયઃ સૂત્રયામાસ કૃત્સ્નમ્ ।
યોઽસૌ વ્યાસાભિધાનસ્તમહમહરહઃ ભક્તિતસ્ત્વત્પ્રસાદાત્
    સદ્યો વિદ્યોપલબ્ધ્યૈ ગુરુતમમગુરું દેવદેવં નમામિ ॥ ૩૭॥

આજ્ઞામન્યૈરધાર્યાં શિરસિ પરિસરદ્રશ્મિ કોટીરકોટૌ
    કૃષ્ણસ્યાક્લિષ્ટ કર્માદધદનુ સરાણાદર્થિતો દેવસઙ્ઘૈઃ ।
ભૂમાવાગત્ય ભૂમન્નસુકરમકરોર્બ્રહ્મસૂત્રસ્ય ભાષ્યમ્
    દુર્ભાષ્યં વ્યાસ્યદસ્યોર્મણિમત ઉદિતં વેદસદ્યુક્તિભિસ્ત્વમ્ ॥ ૩૮॥

ભૂત્વાક્ષેત્રે વિશુદ્ધે દ્વિજગણનિલયે રૌપ્યપીઠાભિધાને
    તત્રાપિ બ્રહ્મજાતિસ્ત્રિભુવન  વિશદે મધ્યગેહાખ્ય ગેહે ।
પારિવ્રાજ્યાધિ રાજઃ પુનરપિ બદરીં પ્રાપ્ય કૃષ્ણં ચ નત્વા
    કૃત્વા ભાષ્યાણિ સમ્યક્ વ્યતનુત ચ ભવાન્ ભરતાર્થપ્રકાશમ્ ॥ ૩૯॥

વન્દે તં ત્વાં સુપૂર્ણ પ્રમતિમનુદિના સેવિતં દેવવૃન્દૈઃ
    વન્દે વન્દારુમીશે શ્રિય ઉત નિયતં શ્રીમદાનન્દતીર્થમ્ ।

વન્દે મન્દાકિની સત્સરિદમલ જલાસેક સાધિક્ય સઙ્ગમ્
    વન્દેઽહં દેવ ભક્ત્યા ભવ ભય દહનં સજ્જનાન્મોદયન્તમ્ ॥ ૪૦॥

સુબ્રહ્મણ્યાખ્ય સૂરેઃ સુત ઇતિ સુભૃશં કેશવાનન્દતીર્થ
    શ્રીમત્પાદાબ્જ ભક્તઃ સ્તુતિમકૃત હરેર્વાયુદેવસ્ય ચાસ્ય ।
ત્વત્પાદાર્ચાદરેણ ગ્રથિત પદલ સન્માલયા ત્વેતયાયે
    સંરાધ્યામૂનમન્તિ પ્રતતમતિગુણા મુક્તિમેતે વ્રજન્તિ ॥ ૪૧॥

ઇતિ શ્રીત્રિવિક્રમપણ્ડિતાચાર્ય વિરચિતં
શ્રીહરિવાયુસ્તુતિઃ સમ્પૂર્ણમ્ ।

॥ અથ શ્રી નખસ્તુતિઃ ॥

પાન્ત્વસ્માન્ પુરુહૂતવૈરિ બલવન્માતઙ્ગ માદ્યદ્ઘટા
    કુમ્ભોચ્ચાદ્રિ વિપાટનાધિકપટુ પ્રત્યેક વજ્રાયિતાઃ ।
શ્રીમત્કણ્ઠીરવાસ્ય પ્રતત સુનખરા દારિતારાતિદૂર
    પ્રદ્ધ્વસ્તધ્વાન્ત શાન્ત પ્રવિતત મનસા ભાવિતાનાકિવૃન્દૈઃ ॥ ૧॥

લક્ષ્મીકાન્ત સમન્તતોઽપિકલયન્ નૈવેશિતુસ્તે સમમ્
    પશ્યામ્યુત્તમ વસ્તુ દૂરતરતોપાસ્તં રસોયોઽષ્ટમઃ ।
યદ્રોશોત્કર દક્ષ નેત્ર કુટિલઃ પ્રાન્તોત્થિતાગ્નિ સ્ફુરત્
    ખદ્યોતોપમ વિસ્ફુલિઙ્ગભસિતા બ્રહ્મેશશક્રોત્કરાઃ ॥ ૨॥

ઇતિ શ્રીમદાનન્દતીર્થભગવત્પાદાચાર્યવિરચિતં
શ્રીનૃસિંહનખસ્તુતિઃ સમ્પૂર્ણમ્ ।

॥ ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

વાયુર્ભીમો ભીમનાદો મહૂજાઃ સર્વેશાં ચ પ્રાણિનાં પ્રાણભૂતઃ ।
અનાવૃત્તિર્દેહિનાં દેહપાતે તસ્માદ્વાયુર્દેવદેવો વિશિષ્ટઃ ॥ ॥

જ્ઞાને વિરાગે હરિભક્તિભાવે ધૃતિસ્થિતિપ્રાણબલેષિ યોગે ।
બુદ્ધૌ ચ નાન્યો હનુમત્સમાનઃ પુમાન્ કદાચિત્ ક્વચકશ્ચ નૈવ ॥ ॥

વાતેન કુન્ત્યાં બલવાન્ સ જાતઃ શૂરસ્તપસ્વી દ્વિષતાં નિહન્તા ।
સત્યે ચ ધર્મે ચ રતઃ સદૈવ પરાક્રમે શત્રુભિરપ્રધૃષ્યઃ ॥ ॥

યો વિપ્રલમ્ભવિપરીતમતિપ્રભૂતાન્ વાદાન્નિરસ્ત કૃતવાન્ભુવિ તત્ત્વવાદમ્ ।
સર્વેશ્વરો હરિરિતિ પ્રતિપાદયન્તમાનન્દતીર્થ મુનિવર્યમહં નમામિ ॥ ॥

યસ્ય ત્રીણ્યુદિતાનિ વેદવચને રૂપાણિ દિવ્યાન્યલમ્ ।
બટ્ તદ્દર્શનમિત્થમેવ નિહિતં દેવસ્ય ભર્ગો મહત્ ।
વાયો રામવચોનયં પ્રથમકં પૃક્ષો દ્વિતીયં વપુઃ ।
મધ્વો યત્તુ તૃતીયમેતદમુના ગ્રન્થઃ કૃતઃ કેશવે ॥ ॥

મહાવ્યાકરણામ્ભોધિ મન્થમાનસમન્દરમ્ ।
કવયન્તં રામકીર્ત્યા હનૂમન્તમુપાસ્મહે ॥ ॥

બ્રહ્માન્તા ગુરવઃ સાક્ષાદિષ્ટં દૈવં શ્રિયઃ પતિઃ ।
આચાર્યાઃ શ્રીમદાચાર્યાઃ સન્તુ મે જન્મ જન્મનિ ॥ ॥

પ્રથમો હનુમાન્નામા દ્વિતીયો ભીમ એવ ચ ।
પૂર્ણપ્રજ્ઞ તૃતીયસ્તુ ભગવત્કાર્યસાધકઃ ॥ ॥

મુખ્યપ્રાણાય ભીમાય નમો યસ્ય ભુજાન્તરમ્ ।
નાના વીરસુવર્ણાનાં નિકષાશ્માયિતં બભૌ ॥ ॥

સ્વાન્તસ્થાનન્તશૈયાય પૂર્ણજ્ઞાનરસાર્ણસે ।
ઉત્તુઙ્ગવાક્તરઙ્ગાય મધ્વદુગ્ધાબ્ધયે નમઃ ॥ ॥

યેનાહં ઇહ દુર્માર્ગાત્ ઉદ્ધૃત્યાદિ નિવેશિતઃ ।
સમ્યક્ શ્રીવૈષ્ણવે માર્ગે પૂર્ણપ્રજ્ઞં નમામિ તમ્ ॥ ॥

હનૂમાનઞ્જનાસૂનુઃ વાયુપુત્રો મહાબલઃ ।
રામેષ્ટઃ ફલ્ગુણસખઃ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥ ॥

ઉદધિક્રમણશ્ચૈવ સીતાસન્દેશહારકઃ ।
લક્ષ્મણપ્રાણદાતા ચ દશગ્રીવસ્ય દર્પહા ॥ ॥

મારુતિઃ પાણ્ડવો ભીમો ગદાપાણિર્વૃકોદરઃ ।
કૌન્તેયઃ કૃષ્ણદૂતશ્ચ ભીમસેનો મહાબલઃ ॥ ॥

જરાસન્ધાન્તકો વીરો દુઃશાસન વિનાશનઃ ।
પૂર્ણપ્રજ્ઞો જ્ઞાનદાતા મધ્વો ધ્વસ્ત દુરાગમઃ ॥ ॥

તત્ત્વજ્ઞો વૈષ્ણવાચાર્યો વ્યાસશિષ્યો યતીશ્વરઃ ॥ ॥

શુભતીર્થાભિધાનશ્ચ જિતામિત્રો જિતેન્દ્રિયઃ ।
શ્રીમદાનન્દ સન્નામ્નામેવ દ્વાદશકં જપેત્ ।
લભતે વૈષ્ણવીં ભક્તિં ગુરુભક્તિ સમન્વિતમ્ ॥ ॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ॥

બુદ્ધિર્બલં યશો ધૈર્યં નિર્ભયત્ત્વં અરોગતા ।
અજાડ્યં વાક્પટુત્ત્વં ચ હનૂમત્સ્મરણદ્ભવેત્ ॥ ॥

ન માધવસમો દેવો ન ચ મધ્વ સમો ગુરુઃ ।
ન તદ્વાક્યસમં શાસ્ત્રં ન ચ તસ્ય સમઃ પુમાન્ ॥ ॥

ભીમસેન સમો નાસ્તિ સેનયોરુભયોરપિ ।
પાણ્ડિત્યેચ પટુત્વે ચ શૂરત્વે ચ બલેપિ ચ ॥ ॥

આચાર્યઃ પવનોઽસ્માકં આચાર્યાણી ચ ભારતી ।
દેવો નારાયણઃ શ્રીશઃ દેવી મઙ્ગળ દેવતા ॥ ॥

ઇતિ ત્રિવિક્રમપણ્ડિતાચાર્યવિરચિતા વાયુસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by H. P. Raghunandan, Shrisha Rao shrao at dvaita.org

---

*vAyu stuti, praising hari (trivikrama paNDita)*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*